# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – जुलाई - २०२१

| | | |
|---|---|---|
| कक्षा – आचार्य – १ | प्रश्नपत्रम् – २ | गुणाः – ५० |
| विषयः – साहित्यम् | सत्रम् – २ | समयः – २ तः ४ |
| दिनाङ्कः – १४/०७/२०२१ | सन्दर्भग्रन्थः – काव्यप्रकाशः | |

**सूचना -** **निम्नलिखितेषु एकादशप्रश्नेषु केचन पञ्चप्रश्नाः विधेयाः।**
**प्रत्येकं प्रश्नस्य समान गुणाः। (१०)**

**प्रश्नः १** **अधोलिखितेषु द्वयोः सोदाहरणं ससन्दर्भं निरूपणं कुरुत ।**

१ श्रुतिकटुत्वम् ।

२ अप्रयुक्तत्वम् ।

३ उपकुर्वन्ति तं सन्तं येऽङ्गद्वारेण जातुचित् ।
हारादिवदलङ्कारास्तेऽनुप्रासोपमादयः ॥

४ गुणवृत्त्या पुनस्तेषां वृत्तिः शब्दार्थयोर्मता ।

**प्रश्नः २** दोषलक्षणं यथाग्रन्थं प्रतिपाद्य अविमृष्टविधेयांशं सोदाहरणं विवृणुत ।

**प्रश्नः ३** 'वक्त्राद्यौचित्यवशाद्दोषोऽपि गुणः क्वचित्क्वचिन्नोभौ ।' कारिकेयं यथाग्रन्थं वर्णयत ।

**प्रश्नः ४** गुणलक्षणं विलिख्य माधुर्यगुणं सोदाहरणं लिखत ।

**प्रश्नः ५** केचिदन्तर्भवन्त्येषु दोषात्यागात्परे श्रिताः ।
अन्ये भजन्ति दोषत्वं कुत्रचित् न ततो दश ॥ कारिकामिमां यथाग्रन्थं चर्चयत ।

**प्रश्नः ६** **अधोलिखितेषु द्वयोः कारिकयोः व्याख्या कार्या ।**

१ वक्तृवाच्यप्रबन्धानामौचित्येन क्वचित्क्वचित् ।
रचनावृत्तिवर्णानामन्यथात्वमपीष्यते ॥

२ वाच्यभेदेन भिन्ना यद् युगपद्भाषणस्पृशः ।
श्लिष्यन्ति शब्दाः श्लेषोऽसावक्षरादिभिरष्टधा ॥

३ विशेषोक्तिरखण्डेषु कारणेषु फलावचः ।

४ भ्रान्तिमानन्यसंवित्तुल्यदर्शने ।

**प्रश्नः ७** उत्प्रेक्षाऽलङ्कारं यथाग्रन्थं सोदाहरणं निरूपयत ।

**प्रश्नः ८** दृष्टान्तदीपककाव्यलिङ्गेषु कयोश्चिद् द्वयोः प्रतिपादनं कुरुत ।

**प्रश्नः ९** रूपकोपह्नुत्योः सलक्षणं सोदाहरणं निरूपणं कुरुत ।

**प्रश्नः १०** अप्रस्तुतप्रशंसायाः पञ्चधात्वं कथं सङ्घटते इति व्याख्यायताम् ।

**प्रश्नः ११ दशानां प्रश्नानां लघूत्तराणि लिखत ।**

१ सप्तमोल्लासस्य नाम किम् ?

२ 'गाहन्तां महिषा निपानसलिलं..... ॥' श्लोकेऽस्मिन् कः दोषः ?

३ किं नाम अवाचकत्वम् ?

४ को नाम पतत्प्रकर्षतादोषः ?

५ 'श्रुतिमात्रेण शब्दात्तु येनार्थप्रत्ययो भवेत् ।' अनेन कस्य गुणस्य बोधः भवति ?

६ वक्रोक्तिः कतिविधा ?

७ शब्दानुप्रासः कतिविधः ?

८ क्व सूर्यप्रभवो वंशः ...... ॥ इत्यत्र कः अलङ्कारः ?

९ दृष्टान्तालङ्कारस्य लक्षणं किम् ?

१० दशमोल्लासस्य नाम किम् ?

११ विरोधालङ्कारः कति प्रकारकः ?

१२ 'व्याजः' इति शब्दस्य कोऽर्थः ?

१३ लिम्पतीव तमोऽङ्गानि ..... ॥ इत्यत्र का संसृष्टिः ?

१४ नवमोल्लासे कस्य वर्णनं कृतम् ?

१५ काव्यप्रकाशकारः कः ?

****